# आचार्यशङ्करमिश्रकृतपरिमाणस्वरूपसमीक्षणम्

**मुनीशकुमारमिश्रः**
**शोधच्छात्रः, वैदिकदर्शनविभागः**
**काशीहिन्दूविश्वविद्यालयः**

'परिमीयतेऽनेनेति परिमाणम्' इति व्युत्पत्त्या येन साधनेन द्रव्यं मापते तत्साधनं परिमाणम्। **''मानव्यवहारासाधारणं कारणं परिमाणम्''**[१] इति लक्षणं प्रायः सर्वत्र प्रसिद्धम्। पदार्थदीपिकायां कौण्डभट्टेन[२] जातिघटितं लक्षणं प्रतिपादितम्। लक्षणावल्यामुदयनाचार्येण भिन्नं लक्षणं कृतम्, यथा- **''संख्यासमवेतत्वरहितसंख्या-समवायिसमवेतसमवेतवत् परिमाणम्''**[३] इति। शङ्करमिश्रेणाऽपि कणादरहस्ये एकं भिन्नं[४] लक्षणं कृतं किन्तु प्रचलितलक्षणस्यापि वर्णनं कृतम्। कणादरहस्ये मिश्रेण 'मान'शब्दस्य स्थाने 'परिमित'शब्दस्य प्रयोगं कृत्वा लक्षणमभिहितम्। यथा- **''परिमितव्यवहारासाधारणकारणगुणत्वम्''**[५] इति। तथा च परिमितव्यवहारनिष्ठकार्यतानिरूपितकारणताश्रय-गुणत्वं परिमाणस्य लक्षणं फलति। परिमितव्यवहारनिष्ठा या कार्यता 'अयमणुः, अयं महान्, अयं दीर्घः, अयं ह्रस्वः' इत्याकारकशब्दप्रयोगनिष्ठा या कार्यता, तन्निरूपितकारणताश्रयत्वस्याऽणुत्वादिपरमाणुषु सत्वाद् भवति लक्षणसमन्वयः। व्यवहारमात्रौक्तौ घटादावतिव्याप्तिः। असाधारणकारणत्वपदानुपादाने ईश्वरादृष्टादेः कार्यमात्रं प्रति साधारणकारणत्वेन परिमितव्यवहारादेरपि कार्यत्वेन तत्कारणत्वस्य ईश्वरादृष्टादौ सत्त्वेन तत्रातिव्याप्तिः। अतोऽसाधारणकारणत्वस्य लक्षणे निवेशः। तन्निवेशे तु परिमितव्यवहार-त्वाद्यवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वमिति लक्षणं फलितम्। ईश्वरादृष्टादेः कार्यमात्रं प्रति साधारणकारणत्वेन परिमितव्यवहारादिनिष्ठकार्यतानिरूपितकारणताश्रयत्वस्य सत्त्वेऽपि परिमितव्यवहारत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयत्वाभावात् नातिव्याप्तिः।

परिमाणं चतुर्विधम्, अणुत्वं महत्त्वं दीर्घत्वं ह्रस्वत्वञ्चेति। चतुर्णामपि परिमाणानामवान्तरभेदेन (नित्याऽनित्यभेदेन) अष्टभेदाः सन्ति। अनित्यस्थाने ग्रन्थकारेण अवान्तरशब्दस्य प्रयोगः कृतः, तथा नित्यस्थाने परमशब्दस्य प्रयोगः कृतः। तेषां स्वरूपं यथा-

| **नित्यपरिमाणम्** | **अनित्यपरिमाणम्** |
|---|---|
| १. अणुत्वम् | ५. अवान्तराऽणुत्वम् |
| २. महत्त्वम् | ६. अवान्तरमहत्त्वम् |
| ३. ह्रस्वत्वम् | ७. अवान्तरह्रस्वत्वम् |

४. दीर्घत्वम्      ८. अवान्तरदीर्घत्वम्

१. **परमाऽणुत्वं परमह्रस्वत्वञ्च**[६]**-** एतयोः परमाणुत्वं पृथिवीव्यप्तेजोवायूनां परमाणुषु तथा मनसि वर्तते। तदेव पारिमाण्डल्यमित्युच्यते। तत्समानाधिकरणम्- अर्थात् परमाणुत्वसमानाधिकरणं परमह्रस्वत्वं वर्तते।

**२. अवान्तराऽणुत्वमवान्तरह्रस्वत्वञ्च**[७]**-** अवान्तराऽणुत्वं द्व्यणुकमात्रे एव तिष्ठति, नान्यत्र। यद्यपि 'अयं घटः तस्माद् घटादणुः' इति लोकव्यवहारे प्रसिद्धं, किन्तु तद्व्यवहारः गौणः। अत एव तस्मिन्नेवाऽणुपरिमाणत्वेन प्रतीयमानघटविषये एव 'सः तृतीयाद् दीर्घः' इत्यपि प्रतीतिर्जायते। अतोऽनित्यमणुपरिमाणं द्व्यणुकमात्रे समवेतम्, अर्थात् पृथिव्यादि-चतुष्टयेषु द्व्यणुकेष्वान्तराऽणुत्वं विद्यते। तत्समानाधिकरणमवान्तरह्रस्वत्वमपि वर्तते।

**३. अवान्तरमहत्त्वमवान्तरदीर्घत्वञ्च**[८]**-** अवान्तरमहत्त्वं पृथिव्यादिचतुर्णां भूतानां त्र्यणुकादारभ्य महीमहीधरसागरादिपर्यन्तम्, अर्थाद् घटपटादिसमस्तकार्यद्रव्येषु अवान्तरमह-त्परिमाणं वर्तते। तथा च तत्समानाधिकरणमेवान्तरदीर्घत्वं वर्तते।

**४. परममहत्त्वं परमदीर्घत्वञ्च**[९]**-** आकाशकालदिगात्मसु चतुर्षु द्रव्येषु परममहत्परिमाणं वर्तते, तथा च तत्समानाधिकरणे एव परमदीर्घत्वमपि वर्तते। ग्रन्थकारमते एवमेव सर्वाणि द्रव्याणि परिमाणद्वययोगी भवन्ति।[१०]

व्योमवतीकारमते परिमाणस्याऽवान्रतभेदसहितं षडेव भेदाः सन्ति। तेषां मते दीघत्वं ह्रस्वत्वञ्च च न नित्यं परिमाणम्, उभयं त्वनित्यमेव।[११] कणादरहस्यमिव विवेचनमुपस्कार-ग्रन्थेऽपि प्राप्यते।[१२] अत्रेयमाशङ्का जायते यदुर्युक्तविभागात् परिमाणमष्टविधं सिद्धं तर्हि कथं परिमाणं चतुर्विधमुक्तम्? तदुच्यते श्रीधराचार्येण- परिमाणं चतुर्विधमेव, नित्यानित्यभेदेन तस्याष्टभेदः।[१३] वस्तुतः एते न परिमाणस्य वास्तविकः भेदाः, अपितु अवान्तरभेदाः। यथा पृथिव्यादिद्रव्याणां नित्याऽनित्यभेदेनाऽवान्तरभेदः तथैव परिमाणस्यापि। अतः एतादृशी शङ्कानिरसनाय ग्रन्थकारेणाऽवान्तरशब्दस्य प्रयोगः कृतः। तथा चोक्तं विश्वनाथेनापि-

**अणु दीर्घ महद्ह्रस्वत्वमिति तद्भेद ईरितः।**
**अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम्।।**[१४]

**ह्रस्वत्वदीर्घत्वसिद्धिः-**

ह्रस्वत्वदीर्घत्वयोर्विषये विभिन्नमताः सन्ति। ग्रन्थकारेण तेषां खण्डनं कृत्वा तयोः सिद्धिः कृता।

१. केचन् मते ह्रस्वत्वं दीर्घत्वञ्च न पृथक्परिमाणम्।

२. केचन् मते ह्रस्वत्वं दीर्घत्वञ्चाऽनित्यमेव।

३. केचन् मते च ह्रस्वत्वं दीघत्वञ्च नित्यमनित्यञ्च।

**प्रथममतखण्डनम्-** प्रथममतस्योल्लेखः कणादरहस्योपस्कारे च मिश्रेण कृतः किन्त्वोपस्कारे खण्डनं न दृश्यते, परन्तु मिश्रेण कणादरहस्ये उक्तमतस्य खण्डनं कृत्वा ह्रस्वत्वदीर्घत्वयोः पृथक्परिमाणयोः सिद्धिः कृता । ये तु ह्रस्वत्वदीर्घत्वे पृथक्परिमाणे न स्वीकृतवन्तः तेषां मतं न समीचीनम्, यतोहि महत्पदार्थेषु दीर्घपदार्थमानीयतामिति निर्धारणबलाद् दीर्घत्वसिद्धिः। तथा च दीर्घपदार्थेषु ह्रस्वत्वमानीयतामिति निर्धारणबलाद् ह्रस्वत्वसिद्धिः। महत्वविशेषविषयकत्वेन अथवा अवयवसंस्थानविशेषविषयकत्वेन च तादृशप्रतीतेः निर्धारणं कर्तुं शक्यते। तथा च इदमस्मान्न महत् किन्तु दीर्घम्, तथा चेदमस्मान्न दीर्घ किन्तु महदिति प्रतीतिवैलक्षण्यादपि दीर्घत्वसिद्धिः। तथा चेदमस्मान्न ह्रस्वत्वं किन्तु महत्, इदमस्मान्न महत् किन्तु ह्रस्वत्वमिति प्रतीतिवैलक्षण्यात् ह्रस्वत्वसिद्धिः। एवञ्च महत्तरेषु दीर्घतरमानीयताम्, महत्तरेषु ह्रस्वतरमानीयतामिति प्रतीत्योरपि दीर्घत्वह्रस्वत्वयोसिद्धिः।[१५] उक्त वर्णनं भाष्येऽपि प्राप्यते।[१६]

अत्रेयमाशङ्का जायते यत् यथा महत्सु दीर्घमानीयतामितिवत् महत्सु वर्त्तुलमानीयतां महत्सु चतुरस्रमानीयतां त्रिकोणमानीयतामिति निर्धारणबलाद् वर्त्तुलादिकमपि परिमाणं कथं न स्यात्? तदुच्यते- '' **तेषां महत्त्वविशेषत्वात्**''[१७] अर्थात् तेषां महत्त्वेऽन्तर्भावो जायते। यद्येवं न क्रियते तर्हि महत्सु दीर्घमानीयतामितिवत् महत्सु वर्त्तुलमानीयतामिति निर्धारणात् यथा वर्त्तुलादिकं परिमाणं स्यात्तथैव महत्सु षट्कोणमष्टकोणमानीयतामिति निर्धारणात् षट्कोणाऽष्टकोणादिकमपि परिमाणं स्यात्, तदा गौरवो भविष्यति। अतः तेषां महत्त्वेऽन्तर्भावः।

पुनराशङ्कते- यदि वर्त्तुलादिकं परिमाणं नास्ति, तेषां महत्त्वेऽन्तर्भावः, तथैव ह्रस्वत्वदीर्घत्वे कथं परिमाणे? तयोः महत्त्वे कथं नाऽन्तर्भावः? तदुच्यते- आचार्योपदिष्टत्वात् तयोः महत्त्वे नान्तर्भावः।

अस्य मतस्य वर्णनं भाष्यान्यायकन्दल्यादिग्रन्थेषु[१८] न प्राप्यते। तत्र द्विविधमतस्यैव चर्चा विद्यते। एकस्मिन्मते उभयं नित्यं नास्ति, अनित्यमेव। तथा चापरे सिद्धान्तमते उभयं

नित्यमनित्यञ्च। आधुनिकव्याख्याकारेण श्रीनारायणमिश्रेणापि[१९] भाष्योक्तद्विविधमतस्यैव विवेचनं कृतम्। यद्यपि व्योमशिवाचार्येण **''परमाणूनां परिमण्डलत्वान्न ह्रस्वत्वम्, आकाशादेव्यापकत्वाच्च न दीर्घत्वम्''**[२०] इत्युक्तं तथापि ह्रस्वत्वदीर्घत्वयोर्विरोधे न तेषां तात्पर्यम्, यतोहि सूत्रकारोक्तत्वात्। तथा च व्योमशिवाचार्येण स्वयमेव परिमाणस्य षड्भेदा: स्वीकृता:। यथा- **''तत्र महत्त्वाणुत्वयोरप्यवान्तरभेदात् षड्विधमपि परिमाणमित्याह''**[२१] इति। अत: व्योमवतीकारस्य ह्रस्वत्वदीर्घत्वयोरवान्तरनित्यभेदस्य निषेधे तात्पर्यमस्ति। कणादरहस्ये मिश्रेण सिद्धान्तसहितं परिमाणविषये त्रिविधं मतमुपस्थापितम्। अयं तु वैशिष्ट्यमस्य शङ्करमिश्रस्य।

**द्वितीयमतखण्डनम्-** व्योमशिवाचार्यमते ह्रस्वत्वं दीघत्वञ्च न नित्यं परिमाणं सङ्कोचविकासावयवसंस्थानविशेषत्वादिति। यथोक्तम्- **''परमाणुनां परिमण्डलत्वान्न ह्रस्वत्वम्, आकाशादेर्व्यापकत्वाच्च न दीर्घत्वम्''**[२२] इति। उक्तमतस्य खण्डनं न्यायकन्दल्यामपि विद्यते, तत्र श्रीधराचार्येण 'अन्ये तु' मतेन निर्देशितम्। येषां मते ह्रस्वत्वदीर्घत्वे न नित्ये तेषां मतस्य खण्डनं कृत्वा उदयनाचार्य: कथयति- **''एते नित्ये न स्त इति केचित्, तदसत:, तथाहि महत्त्वं प्रकृष्यमाणं परां काष्ठां प्राप्नोति तथा दीर्घत्वमपि प्राप्नुयात्। यथा चाणुत्वमपकृष्यमाणं परां काष्ठां प्राप्नोति तथा ह्रस्वत्वमपि, उपपत्तेरुभयत्र तुल्यत्वात्.....तथा च परमदीर्घत्वपरमह्रस्वत्वे परममहत्त्व-परमाणुत्वेकार्थ समवेते इति हृदयम्।''**[२३] मिश्रेणाप्युदयनाचार्यमिव खण्डनं कृतम्- **''तन्न, परममहत्त्ववदितरापेक्षया आकाशादीनां परमदीर्घत्वस्य परमाणुषु परमह्रस्वत्वस्य चौपपत्तिकप्रतीते:''**[२४] तथा च **''एतेन दीघत्वह्रस्वत्वे व्याख्यायते''**[२५], **''नित्येषु नित्यम्''**[२६], **''अनित्येषु अनित्यम्''**[२७] इति सूत्रैरपि यथा महत्त्वाऽणुत्वे नित्यमनित्यं तथा दीर्घत्वह्रस्वत्वेऽपि नित्यमनित्यञ्च। अणुत्वह्रस्वत्वे महत्त्वदीर्घत्वे परिमाणे नियतसामानाधिकरण्यादपि नाभेद:, अपितु व्यवहारबलेन भेद:। यथा महत्परिमाणवत्त्वात् स्तम्भ: दीर्घपरिमाणस्याप्यधिकरण: तथैवाकाशादिरपि परमदीर्घत्वपरिमाणाश्रय:। एवञ्च यथा द्व्यणुकेऽणुपरिमाणस्य सत्त्वेऽपि तत्र ह्रस्वपरिमाणं वर्तते तथैव परमाणावपि ह्रस्वपरिमाणम्, यतोहि सोऽप्यणुपरिमाणवत्त्वं भवतीत्यनुमानेन श्रीधराचार्येण भेद: प्रदर्शित:।[२८]

उपर्युक्तविवेचनात् सिद्धं यत्पूर्वे मिश्रेण परिमाणस्य ये अवान्तरभेदसहितोऽष्टभेदा: प्रतिपादिता: ते तु शास्त्रसम्मता एव। परिमाणस्य नित्याऽनित्यभेदाभ्यामष्टभेदा: सूत्रकारमतसम्मता एव सन्ति।

अत्रेयमाशङ्का जायते यद् द्व्यणुकेष्वेवाऽनित्यं (अवान्तरह्रस्वत्वम्) परिमाणं तर्हि तत्कथं कुवलयापेक्षया आमलकादौ अणुत्वव्यवहार:? तथा च यदि परमाणुषु परममहत्त्वमुच्यते तर्हि तत्कथं समिदादिषु तदपेक्षया ह्रस्वत्वव्यवहार:? अस्य समाधानं कुर्वन् ग्रन्थकार: कथयति- **''तद्व्यवहारस्य भाक्तत्वात्''**[२९] अर्थाद् बिल्वे य: प्रकर्षभाव: महत्प-रिमाणरूपविशेषसम्बन्ध: स आमलके नास्ति, तथा चामलके य: उत्कृष्टमहत्परिमाण-विशेषसम्बन्ध: स: कुवलये नास्ति, अत: बिल्वापेक्षयाऽऽमलकेऽणुत्वव्यवहार:, तथा आमलकापेक्षया कुवलयेऽणुत्वव्यावहार:। कुवलयादिष्वणुत्वव्यवहार: गौण:। एवमेव समिदादिषु परमार्थत: दीर्घत्वस्य सत्वादपि वंशपरिमाणस्य य: प्रकर्षभाव: विशिष्टदीर्घ-परिमाणविशेषसम्बन्ध: तादृशसम्बन्धस्य इक्षावभाव:, अत: वंशापेक्षया इक्षौ ह्रस्वत्वव्यवहारो भाक्त:। तथा च इक्षौ य: दीर्घपरिमाणविशेषसम्बन्ध: तादृशसम्बन्धस्य समिधेऽभावात् तत्र इक्ष्वपेक्षया समिधे भाक्तव्यवहार:। **''भक्तिश्च प्रकर्षभाव एव उभाभ्यां भजनात्''**[३०] इति। श्रीधराचार्यमते तु भक्ति: सादृश्यम्।[३१] अत: सूत्रकारेण **''अणु महदिति तस्मिन् विशेष-भावात् विशेषाभावाच्च''**[३२] इत्युक्तम्। अस्य विशद्विवेचनं भाष्यन्यायकन्दल्युपस्कारादिषु[३३] च प्राप्यते।

यत्राऽणुत्वस्य मुख्यव्यवहार: यथा द्व्यणुके, तत्र महत्परिमाणाभावस्य प्रतीतिर्भवति। आमलकेऽपि अणुत्वस्य भाक्तव्यवहारस्य प्रवृत्ति एतावत्सादृश्येन भवति, यत् विल्वे यादृशमुत्कृष्टपरिमाणं तादृशपरिमाणस्यामलकेऽभाव:।

ग्रन्थकारमते समिदादिषु ह्रस्वत्वस्य मुख्यव्यवहार: न स्वीकर्तुं शक्यते, यतोहि तेष्वेव परस्परसापेक्ष: दीर्घत्वस्यापि व्यवहारो जायते। ह्रस्वत्वं दीर्घत्वञ्च परस्परं विरुद्धम्, अत एकाधिकरणे उभयो: वास्तविकी सत्ता स्वीकारयोग्या।[३४] अवान्तरमहत्त्वदीर्घत्वयो: भेदस्थापने प्रत्यक्षमेव प्रमाणं वर्तते, किन्तु परमदीर्घत्वह्रस्वत्वयोर्भेदे किं प्रमाणमिति प्रश्नसमाधाने **''योगिप्रत्यक्षमेव''**[३५] इत्युक्तम्। अर्थाद् द्व्यणुकवृत्तिपरमदीर्घत्वह्रस्वत्वयो: भेदज्ञानयो: योगिजना एव विशिष्टप्रत्यक्षं कुर्वन्ति। केचित्तु मते अनुमानप्रमाणेनापि तयोर्भेदसिद्धि:। अनुमानस्य स्वरूपं तावत्- **''अणुपरिमाणं स्वसमानाधिकरणपरिमाणभिन्नं परिमाणत्वात् महत्त्ववत्''**, तथा च **''परममहत्त्वं स्वसमानाधिकरणपरिमाणभिन्नं परिमाणत्वात् महत्त्ववत्''** इति।[३६]

**परिमाणोत्पत्तिकारणनिरूपणम्-**

उपर्युक्ताष्टविधेषु चतुर्विधमनित्यं (अपृकृष्टमवान्तरं वा) परिमाणं कै: कारणै ऊत्पद्यन्तेति विषये निर्देशं कृत्वा ग्रन्थकार: कथयति यत् **''तत्रानित्यमहत्त्वं संख्यापरिमाणप्रचश्योनि,**

**त्रसरेणुयोनि संख्यामात्रयोनि''**[३७] अर्थादनित्यपरिमाणेषु द्व्यणुकेष्वणुपरिमा-णोत्पत्तिः संख्याजन्या, यतोहि अवयवमहत्त्वप्रचययोस्तत्राभावात्। तथा चानित्यमहत्त्वस्योत्पत्तिः यथावसरे संख्यापरिमाणप्रचयजन्या। उक्तमतस्य पुष्टिः **''कारणबहुत्वाच्च''**[३८] इति सूत्रेण भवति। एतेषा त्रयाणां कारणानामुल्लेखः प्रायः भाष्यादिषु सर्वत्रोपलभ्यते।[३९]

**संख्याजन्यपरिमाणोत्पत्तिः-**

महत्परिमाणयुक्ताभ्यां द्वाभ्यां कपालाभ्यामारब्धं घटपरिमाणं महत्त्वादपि कपालपरिमाणोत्कृष्टं भवतीति प्रत्यक्षसिद्धम्। इत्थम्प्रकारेण महत्पतरमाणसम्पन्नैः नानाकाष्ठखण्डैः निर्मितानां शय्यादिपदार्थानां महत्परिमाणमवयवानां महत्परिमाणेनोत्कृष्टं भवति। अतः परिमाणं स्वसजातीयोत्कृष्टपरिमाणरम्भकम्।[४०] द्व्यणुके कथमणुपरिमाणोत्पत्तिः? तदुच्यते- अत्र यदि द्व्यणुकसमवायिकारणपरिमाणौ विद्यमानं परमाणुपरिमाणमेव द्व्यणुकगतपरिमाणस्य प्रयोजकं स्वीक्रियते चेत् तर्हि पूर्वोक्तनियमात् परमाणुपरिमाणाऽऽरब्धं द्व्यणुकपरिमाणं परमाणुतरं स्यात्, तथा चेत्थमिव परमाणुनिष्ठपरमाणुपरिमाणस्य परमत्त्वमेव विनष्टं स्यात्। एवञ्च परमाणुतरपरिमाणस्य प्रसिद्धिरपि न स्यात्। अतः द्व्यणकेऽणुपरिमाणोत्पत्तये परमाणुद्वये ईश्वरापेक्षाबुद्धिजन्यद्वित्वसंख्ययैव द्व्यणुकपरिमाण-स्योत्पत्तिः स्वीकर्त्तव्या। एवमेव द्व्यणुके वर्तमानह्रस्वत्वस्योत्पत्तिरपि संख्याजन्या।

एवमेव त्र्यणुकस्य महत्परिमाणमपि तदुपादानभूतत्रयेषु द्व्यणुकेश्वीश्वरापेक्षाबुद्धिजन्या त्रित्वसंख्ययैवोत्पद्यते, यतोहि महत्परिमाणस्य त्रिणि कारणानि सन्ति- कारणमहत्त्वं कारणबहुत्वं प्रचयश्च। प्रकृते त्र्यणुकसमवायिकारणद्व्यणुके महत्त्वाभावात् प्रथमस्य निर्वाहः। द्व्यणुकत्रयसंयोगे शैथिल्याभावात् कारणप्रचयेनापि न निर्वाहः।[४१] अतः परिशेषात् द्व्यणुकत्रयनिष्ठत्रित्वसंख्याऽपि त्र्यणुकमहत्त्वस्य प्रयोजिका मन्यते। त्र्यणुकदीर्घत्वस्यापि इयमेव स्थितिः। अतः विश्वनाथेनोक्तम्- **''अतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्य समवायिकारणमित्यर्थः''**[४२] इति।

**परिमाणजन्यपरिमाणोत्पतिः-**

परिमाणजन्यमहत्परिमाणवान् द्रव्याणां द्विविधं स्वरूपं वर्तते। यथा-

१. **द्वे महत्परिमाणवदवयवारब्धः।**

२. **द्वेऽधिकमहत्परिमाणवदवयवारब्धः।**[४३]

द्विमहत्परिमाणवदवयवारब्धोऽवयवी अपि द्विविधम्। (१) समानपरिमाणवदवयवद्वयाऽऽरब्धोऽवयवी। (२) असमानपरिमाणवदवयवद्वयाऽऽरब्धोऽवयवी। यद्यप्युभयोः भेदयोः अवयवानां परिमाणं साजात्यं तथापि तरतमभावात् साम्यवैषम्यं स्वीक्रितम्। उभयोः अवयविपरिमाणं यद्यवयवसंयोगप्रचयं नास्ति तर्हि अवयवगतमहत्परिमाणमात्रजन्यम्।

अनेकमहदवयवारब्धानां द्रव्याणां चतुर्विधप्रकाराः विद्यन्ते-

**१. असमानपरिमाणसमसंख्यकावयवाराब्धः।**
**२. समानपरिमाणाऽसमसंख्यकावयवारब्धः।**
**३. समानपरिमाणसमसंख्यकावयवारब्धः।**
**४. असमानपरिमाणाऽसमसंख्यकावयवारब्धः।**

एतेषु प्रथमवर्गीयावयवद्रव्याणां महत्परिमाणमयवनिष्ठमात्रपरिमाणादेवोत्पद्यते, न तु संख्यया, यतोहि संख्यायाः साम्यत्वादपि दशबृहत्पृष्ठैः निर्मिता तथा च दशह्रस्वपृष्ठैः निर्मिता पुस्तकपरिमाणयोः तारतम्यं स्फुटमस्ति। उपर्युक्तविभागं श्रीनारायणमिश्रेण स्वग्रन्थे कृतम्।[४४]

द्वितीयवर्गस्यावयविपरिमाणविषये द्विविधं मतं वर्तते। अत्र श्रीधराचार्यमते संख्यापरिमाणञ्चोभयमेव कारणम्, अत एव समानपरिमाणवद्दशतन्त्वाराब्धे पटपरिमाणे तत्समानपरिमाणवत् विंशतितन्त्वारब्धे परिमाणे च तारतम्यं प्रत्यक्षमुपपन्नम्।[४५] द्वितीये हरिदासीटाकीकारमते इदं परिमाणं संख्यामात्रजन्यम्, न तु परिमाणजन्यम्, यतोहि परिमाणस्य समानत्वात् तम् उपर्युक्तद्वयोः प्रत्यक्षसिद्धपरिमाणयोः तारतम्योत्पादकं न स्वीकर्तुं शक्यते।[४६]

तृतीयवर्गस्यावयविद्रव्याणां परिमाणविषयेऽपि द्वे मते स्तः। श्रीधराचार्यादिमतेषु अवधृतसामर्थ्यात् संख्यापरिमाणञ्चोभयं प्रयोजकम्।[४७] अन्येषां मते तु परिमाणमेवास्य प्रयोजकम्, यतोहि सजातीयत्वात् कार्योत्पत्त्यनन्तरं विजातीयकारणकल्पना अनावश्यकी। यथा- **''अपरे तु परिमाणस्यैव कारणतामाहुः, समानजातीयात् कार्योत्पत्तिसम्भवे विजातीयकारणकल्पनानवकाशात्''** इति।[४८]

**प्रचयजन्यपरिमाणोत्पत्तिः-**

किं नाम प्रचयः? तदुच्यते- **''प्रचय इति द्रव्यारम्भकः प्रशिथिलसंयोगविशेषः'' प्रचयश्च आरम्भकः संयोगः, स च स्वाभिमुखकिञ्चिदवयवाऽसंयुक्तत्वे सति स्वाभिमुखकिञ्चिदवयवसंयोगलक्षणः''**[४९] इति। दिनकरीकारेणास्य भिन्नं लक्षणं प्रतिपादितम्-

यथा "**भूयोऽवयवाऽवच्छेदेन अवयवान्तराऽसंयोगिन्यवयवे वर्तमानः संयोगः प्रचयः**"[५०] इति।

यथा द्वितूलकपिण्डाभ्यां यत्रेकावयविद्रव्यस्य तूलपिण्डोत्पत्तिर्जायते, तत्र कारणपिण्डात् कायपिण्डे महत्परिमाणोत्कर्षदर्शनात् प्रचयसंयोग एव कारणम्, यतोहि उभयोः कारणपिण्डयोः अनेकसंख्याऽभावात्, तथा च महत्परिमाणस्य सत्त्वादपि सः कायपिण्डादधिकपरिमाणवत्त्वे न प्रयोजकः। अस्मिन् विषये न्यायकन्दल्यां द्वे मते प्रतिपादिते श्रीधराचार्येण। यथा[५१]-

१. केचित् मते उक्तप्रकारकावयवानां प्रचययादवयविनः महत्परिमाणोत्पादने तदत्पादकावयवान् अवयवेषु विद्यमानप्रशिथिलसंयोगरूपप्रचयस्यापि साहाय्यस्यावश्यकता भवति।

२. केषाञ्चित् मते उक्तप्रचयसंयोगसहाय्यस्य नावश्यकता भवति, अवयवानामवयवेषु विद्यमानसाधारणसंयोगादेव निर्वाहः। कणादरहस्ये ग्रन्थकारेणास्य त्रैविध्योत्पत्तिः प्रतिपादिता। यथा-

१. समानमहत्त्वसमानबहुत्त्वावयवारब्धद्रव्यपेक्षया तूलकादिपरिमाणोत्कर्षदर्शनात्।

२. अवयवप्रचयमहत्त्वसाम्ये भूयोवयवारब्धे महत्त्वोत्कर्षदर्शनात्।

३. बहुत्त्वसमानप्रचयबहुत्त्वावयवारब्धद्रव्यापेक्षया महावयवारब्धे महत्त्वोत्कर्षदर्शनात्।[५२]

द्वितूलकपिण्डे महत्परिमाणोत्पत्तिं प्रति न बहुत्वसंख्यामहत्त्वं कारणम्, यतोहि "**समानसंख्यापलपरिमाणैरारब्धेऽतिशयदर्शनात्**"[५३] इति। तथा च "**संख्या च पलञ्च परिमाणञ्च संख्यापलपरिमाणानि, समानानि संख्यापलपरिमाणानि येषां तैः, आरब्धेऽतिशयदर्शनात्**"[५४] इति। यद्युक्तमहत्त्वस्य संख्यामात्रेव कारणम्, प्रचयं नास्ति, तर्हि त्रिभिर्चतुर्भिर्वा अवयवानां प्रशिथिलसंयोगारब्धपरिमाणेषु तथा च त्रिभिर्चतुर्भिर्वा निविडसंयोगारब्धपरिमाणेषु भेदः नोत्पद्यते, यतोहि उभयोः द्रव्ययोः कारणयोः समानसंख्यात्वात्। यदि च महत्त्वमात्रमेवोक्तपरिमाणस्य कारणं मन्यते तर्हि महत्त्वप्रचय-युक्ताभ्यामवयवाभ्यामुत्पन्नपरिमाणे तथा च प्रचयरहितमहत्त्वसहिताभ्यामवयवाभ्यामुत्नन्नद्रव्यस्य महत्त्वे न भेदोपलब्धिर्जायते, किन्त्वुभयोः परिमाणयोः भेदः भवत्येव। अतः न संख्या कारणं न वा महत्त्वं कारणम्, अपितु प्रचयमात्रमेव कारणम्।[५५]

---

[१] मानव्यवहारकारणम्- प्र. पा. भा., पृ. ३१४। उप., पृ. ३७९। तर्कभाषा, पृ. ३९७। तर्कसंग्रहः, पृ. ५३।
परिमाणं भवेन्मानव्यवहारकारणम्- भा. प., कारि. १०९।

[२] प. दी., पृ. ४१। त. प्र., पृ. ९१।

[३] लक्ष, पृ. २०।

[४] एकवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वम्- क. र., पृ. ४०।

[5] तदेव।
[6] क. र., पृ. ४०
[7] तदेव।
[8] तदेव।
[9] तदेव।
[10] एवमेव सर्वमेव द्रव्यं परिमाणद्वययोगी- क. र., पृ. ४०।
[11] तत्र महत्त्वाणुत्वयोरप्यवान्तरभेदात् षड्विधमपि परिमाणमित्याह- व्यो., पृ. ५१।
[12] उप., पृ. ३८०।
[13] न्या. क., पृ. ३१७।
[14] भा. परि., कारि. ११०
[15] क. र., पृ. ४०।
[16] प्र. पा. भा., पृ. ३३०।
[17] क. र., पृ.
[18] न्या. क., पृ. ३२०-३२१।
[19] वै. द. ए. अ., पृ. ११५।
[20] व्यो., पृ. ५२।
[21] व्यो., पृ. ५१।
[22] व्यो., पृ. ५२।
[23] किर., पृ. ४६६।
[24] क., र., पृ. ४०
[25] वै. सू. ७.१.१४
[26] वै. सू. ७.१.१७
[27] वै. सू. ७.१.१९
[28] दीर्घपरिमाणाधिकरणमाकाशं महत्परिमाणाश्रयात् स्तम्भादिवत्। एवं ह्रस्वपरिमाणश्ररू: परमाणु: अणुपरिमाणाश्रयत्वात्- न्या. क., पृ. ३२१।
[29] क. र., पृ. ४०
[30] क. र., पृ. ४० । भक्तिश्च प्रकर्षभाव:- उप., पृ. ३८०।
[31] उभाभ्यां भज्यत इति भक्ति: सादृश्यम्- न्या. क., पृ २१९।
[32] वै. सू. ७.१.११
[33] (क) प्र. पा. भा., पृ. २१९। (ख) न्या. क., पृ. २१९-२२।
(ग) बिल्वामलकादावणत्वव्यवहार:, समिदिक्षुदण्डादिषु ह्रस्वत्वव्यवहारो भाक्त:- उप., पृ. ३८०।
[34] यत्र वास्तवं ह्रस्वत्वं यत्र चावास्तवमुभयत्रापि प्रकर्षभावस्य सत्त्वात्- क. र., पृ. ४०
[35] तदेव।
[36] क. र., पृ. ४०।
[37] तदेव
[38] वै. सू. ७.१.९।
[39] प्र. पा.भा., पृ. १२०-२२। न्या. क., पृ. १२२। मा. मनो., पृ. ६७। उप., पृ. ३८१। न्या. सि. मु., पृ. ५३५।
[40] परिमाणात् समानजातीयस्यैव परिमाणस्योत्पत्त्यवगमात्- न्या. क., पृ. ३२३।
[41] अवयवमहत्त्वप्रचयोस्तत्राभावात्- क. र., पृ. ४१।
[42] न्या. सि. मु., पृ. ५३५।
[43] प्र. पा. भा., पृ. ३२४।
[44] वै. द. ए. अ., पृ. ११८।
[45] यत्र तु समानपरिमाणैरवयवैरारब्धयोरवयवसंख्याबाहुल्यादेकत्र परिमाणातिशयो दृश्यते तत्रावयवसंख्यापि कारणमेष्टव्या, अन्यथा कार्यविशेषायोग:- न्या. क., पृ. ३२५। व्यो., पृ. ४७७। किर., पृ. ६६९। उप., पृ. ३८१।
[46] हरि. वृत्ति, न्या. कु., स्त. ५, कारि. १।
[47] न्या., क., पृ. ३२५। व्यो., पृ. ४७७। किर., पृ. ६६९।
[48] न्या., क., पृ. ३२५।
[49] क. र., पृ. ४१।

[50] दिन., पृ.
[51] तदेव।
[52] क. र., पृ. ४१।
[53] प्र. पा. भा., पृ. ३२७।
[54] न्या. क., पृ., ३२७।
[55] न्या. क., पृ. ३२७।